# 2020

## SANSKRIT — HONOURS

### Paper : DSE-1

### (DARŚANA)

### Full Marks : 65

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section – A**

**(Unit – I)**

1. अधस्तनेषु कस्यचि***देकस्य*** उत्तरं संस्कृतभाषया देवनागरीलिप्या च दातव्यम्।

   (a) तर्कभाषासम्मतं कारणलक्षणं किम्? 'कार्यानुकृतान्वयव्यतिरेकि कारणम्'— इति कारणलक्षणं युक्तमयुक्तं वेति तर्कभाषादिशा विचार्यताम्। 3+7

   (b) का साक्षात्कारिणी प्रमा? सा च कतिधा? तस्याः करणत्रयं सोदाहरणं विचार्यताम्। 2+2+6

   (c) कस्तावत् सन्निकर्षः? सोदाहरणं सन्निकर्षविभागः आलोचनीयः। 2+8

2. अधोनिर्दिष्टेषु कस्यचि***देकस्य*** व्याख्या कार्या (संस्कृतभाषया देवनागरीलिप्या च)। 8×1

   (a) तज्जन्यस्तज्जन्यजनकोऽवान्तरव्यापारः।

   (b) सविकल्पकं नामजात्यादियोजनात्मकं डित्थोऽयम्।

   (c) साधकतमं करणम्।

3. अधस्तनेषु विषय***द्वयम्*** अवलम्ब्य टीका कार्या (संस्कृतभाषया देवनागरीलिप्या च)। 6×2

   अयुतसिद्धः, स्मृतिः, अन्यथासिद्धः, निर्विकल्पकप्रत्यक्षम्।

**Unit – II**

4. अधस्तनेषु कस्यचि***देकस्य*** व्याख्या कार्या (संस्कृतभाषया देवनागरीलिप्या च)। 10×1

   (a) विशेषस्तु सामान्यरहित एकव्यक्तिवृत्तिः।

   (b) मनस्त्वजातियोगि स्पर्शशून्यं क्रियाधिकरणं मनः।

(c) हेतवे जगतामेव संसारार्णवसेतवे।
प्रभवे सर्वविद्यानां शम्भवे गुरवे नमः।।

(d) अभावस्तु चतुर्विधः।

5. अधोलिखितेषु ***पञ्च प्रश्नाः*** संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। 2×5

(a) प्रत्यक्षप्रमायाः स्वरूपं किम्?

(b) किं तावत् पक्षत्वम्?

(c) सप्तपदार्थीति ग्रन्थे प्रतिपादितमात्मनः लक्षणं किम्?

(d) कर्म कतिविधम्? कानि च तानि?

(e) उपाधिस्वरूपं किम्?

(f) ऊहलक्षणं किम्?

(g) सप्तपदार्थीग्रन्थे हेत्वाभासः कतिविधः?

(h) अभावप्रत्यक्षे कीदृशः सन्निकर्षः स्वीकृतः?

## Section – B

### (Unit – I)

6. अधस्तनेषु कस्यचि***देकस्य*** प्रश्नस्योत्तरं संस्कृतभाषया देवनागरीलिप्या च विधातव्यम्।

(a) संसारानलतप्तस्य शिष्यस्य का गतिः? तञ्च उद्धर्तुकामः गुरुः किमुपदिशति इति विवेकचूड़ामणि-ग्रन्थदिशा व्याख्येयम्। 2+8

(b) मोक्षसाधनस्य किं तावत् परमं साधनम्? आत्मज्ञानस्य माहात्म्यं पाठ्यांशे यथा वर्णितं तथालोच्यताम्। 2+8

(c) अपरोक्षानुभवस्य आवश्यकता अस्ति न वेति ग्रन्थदिशा व्याख्यायताम्। 10

7. अधोनिर्दिष्टेषु विषय***मेकम***वलम्ब्य टीका कार्या (संस्कृतभाषया देवनागरीलिप्या च)। 5×1

शिष्यप्रशंसा, ब्रह्मानन्दरसः, अविद्या।

---